Shri Raghunatha Temple MSS. Library,
JAMMU

No. ९८ / घ

Title लिङ्गानुशासन वृत्तिः

Author भट्टोजिदीक्षितः

Extent ५ पत्र  Age सं. १८२६

Subject व्याकरण

लिंगानुशासनवृत्तिः

१७

2 पन्नानि

ति गान्स्ना... वला दे

२५०



श्रीगणेशाय नमः ॥ लिंगं ॥ स्त्री ॥ अधिकारसूत्रे । एतो ऋकारांता मातृदुहितृस्वसृयातृननांदरः । ऋकारांता एते पंचै
व स्त्रीलिंगाः । स्वस्रादिसप्तकस्यैव ङीन्निषेधेन कर्त्री इत्यादेर्ङीपा ईकारांतत्वात् । तिसृचतस्रौ तु स्त्रियामादेशात्
ए॥ त्रिश्चतेपि प्रकृत्योः स्त्रियां चतुरोर्ईदंतत्वाभावात् । अन् ऊ प्रत्ययांतो धातुः । अनि प्रत्ययांत ऊ प्रत्ययांतश्च धातुः स्त्रि
यां स्यात् । अवनिः । चमूः । प्रत्ययग्रहणं किं । देवयतेः क्विप् शदयः । विशेष्यलिंगा । अशनिभरण्यररण्यः पुंसि च इय
मयं वा । अशनिः । मिन्यंतः । मिप्रत्ययांतो निप्रत्ययांतश्च धातुः स्त्रियां स्यात् । भूमिः । ग्लानिः । वह्निवृष्ण्यग्नयः पुंसि । पूर्वस्या
पवादः । श्रोणियोन्यूर्मयः पुंसि च । इयमयं वा । श्रोणिः । क्तिन्नंतः । स्पष्टं । कृतिरित्यादि । ईकारांतश्च । ईप्रत्ययांतः स्त्री स्यात् । ल
क्ष्मीः । ऊङाबंतश्च । कुरूः । विद्या । यूतमेकाक्षरं । श्रीः । भूः । एकाक्षरं किं । पृथुश्रीः । विंशत्याद्या नवतेः । इयं विंशतिः । त्रिंशत् ।
चत्वारिंशत् । पंचाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । दुंदुभिरक्षेषु । इयं दुंदुभिः । अक्षेषु किं । अयं दुंदुभिः वाद्यवि
शेषोऽसुरो वेत्यर्थः । नाभिरक्षत्रिये । इयं नाभिः । उभावन्यत्र पुंसि । दुंदुभिनाभिशब्दौ त्रिविषयादन्यत्र पुंसि स्तः । नाभिः क्षत्रियः ।
कथं तर्हि समुल्लसत्पंकजपत्रकोमलैरुपाहितश्रीणि सुपर्णीविनाभिरिति भारविः । उच्यते । दृढभक्तिरित्यादिवत्कोमलै
रिति सामान्येन नपुंसकं बोध्यं । वस्तुतस्तु लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्यात् तुस्तुमपि इह साधु । अतएव ना
भिर्मुखान्ने पेचकमध्यदेशे त्रियोः पुमान्नाभिर्द्वयोः प्राणिगती कस्यां स्त्रियां कुरूरिका । मद इति मेदिनिः । रभसो साहामुखारात् ॥ १ ॥

द्वित्रियेनाभिः पुंसि त्राणेयंगकेद्वयोः। चक्रमध्ये अक्षने वस्त्रियां कस्तूरिकामद इति। एवं विधेन्यत्रापि बोध्यां। तलंतः। त्वप्रत्ययः स्त्रियां स्यात्॥
शुक्लस्य भावः शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता। ग्रामस्य समूहो ग्रामता। देव एव देवता। भूमिविद्युत्सरिल्लतावनिताभिधानानि॥
भूर्भूमिः। विद्युत्सौदामिनी। सरिन्निम्नगा। लता वल्ली। वनिता योषित्। यादो नपुंसकं। यादःशब्दः स्त्रीरिहा च कोपि क्लीबे
सुकू ८ स्यात्। भास्स्रग्दिगुष्णिगुपानहः। एते स्त्रियां स्युः। इयं भा इत्यादि। स्थूणोर्णे नपुंसके च। एते स्त्रियां क्लीबे च स्तः। स्थू
णा। स्थूणं। ऊर्णा। ऊर्णं। तत्र स्थूणा काष्ठमयी द्रुकर्णिका। ऊर्णा तु मेषादिलोम। गृहशशाभ्यां क्लीबे नियमा
र्थमिदं। गृहशशशब्दे स्थूणोर्णे यथासंख्यं नपुंसके स्तः। गृहस्थूणं। शशोर्णं। शशोर्णं शशलोमनि। अमरः। प्रावृड्विप्रु
ड्रुड्त्रुड्विड्त्विषः। एते स्त्रियां स्युः। दर्विविदिवदिखनिशान्यभ्रिवेशिकृष्योषधिकट्यंगुल्यः। एते स्त्रियां स्युः। पक्षे ङी
ष्। दर्वी दर्विरित्यादि। तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः। एते प्राग्वत्। इयं तिथिरित्यादि। अमरस्त्वा
ह तिथिस्तिथ्योर्द्वयोरिति। तथा च रविः। तस्यास्तु विवक्षु तिथ्या स्तिथय इति। स्त्रीलिंगे हि वक्तुं तिथय इति स्यात्। श्रीहर्षश्च निखि
लाश्चिशिपौर्णिमातिथीनिति। शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपंक्तयः। एते स्त्रियां स्युः। इयं शष्कुलिः। प्रतिपद
आपद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः। इयं प्रतिपदित्यादि। उषा प्रातः उषा प्रात्यति रात्रिशेषात्रीदेवता। आ
शीर्धूर्पूर्गीर्द्वारः। इयमाशीरित्यादि। अप्सुमनस्समासिकतावर्षाणां बहुत्वं च। अबादीनां पंचानां स्त्रीत्वं स्याद्बहुत्वं च। आपः इमाः। स्त्रियः।

सुमनसः पुष्पाः सुमना मालतीजातिः। देवबाची तु पुंस्येवा सुपर्वाणः सुमनसः। बहुत्वं प्रायिकं। एकाव सिकता तैलदाने ऽसमर्थेति
अर्थवत्सूत्रे भाष्यप्रयोगात्। समांसमां विजायत इत्यत्र समां समायामिति भाष्याच्च विभाषाप्रावृषेति तिसृत्रेत्र अप्सु प्रसाता सुमनसा
इति शिष्टैः इति व्याख्याया हरदत्तोप्येवं। सकृत्वक्ज्योग्वाग्यवागूनौस्फिजः। इयं सकृत्वक्ज्योक्वाक्। यवागूः। नौः। स्फिक्। ऋदिसीमासंब
धाः। इयं ऋदिः। सीमा। संबधाः। तुल्यवेलिसार्यश्च स्पष्टं। तारा धारा ज्योत्स्नादयश्च। शलाकाः स्त्रियां नित्यं। नित्यग्रहणमन्येषां क्वचिद्व्य
भिचारं ज्ञापयति। इति स्त्र्यधिकारः। पुमान्। २ अधिकारोयां घञबन्तः। पाकः त्यागः करोगरः। भावार्थ एवेदं। नपुंसकत्वविशिष्टे भावे क्त
ल्युटौ खल् विशिष्टे तु क्तिन्नादिभिर्बाधनपरिशेषात्। कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गं। तथा च भाष्यं। संबंधमनुवर्तिष्यत
इति। घाजन्तश्च। विस्तरः। गोचरः। चयः। जयः। इत्यादि। भयलिङ्गभगपदानि नपुंसके। एतानि नपुंसके स्युः। भयलिङ्गं भगपदं।
नङन्तः। नङ्प्रत्ययान्तः पुंसि स्यात्। यत्नः। प्रश्नः। याञ्चा स्त्रियां। पूर्वस्यापवादः। क्यन्तो घुः। किप्रत्ययान्तो घुः पुंसि स्यात्। आदिः। नि
धिः। उदधिः। क्यन्तः किः। दानं। घु किं। जनिर्बीजं। इषुधिः स्त्री च। इषुधिशब्दः स्त्रियां पुंसि च स्यात्। पूर्वस्यापवादः। देवासुरात्मस्वर्गगिरि
समुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि। एतानि पुंसि स्युः। देवाः। अमराः २ असुराः। दैत्याः। २ आत्मा। क्षेत्रज्ञः। २ स्वर्
गः। नाकः। २ गिरिः। पर्वतः। २ समुद्रः। अब्धिः। २ नखः। करुरुहः। केशाः। शिरोरुहाः। २ दन्तः। दशनः। २ स्तनः। कुचः। २ भुजः। दोः। २ कण्ठः। गलः। २ खड्गः।
करवालः। २ शरः। मार्गणः। २ पङ्कः। कर्दमः। २ इत्यादि। त्रिविष्टपत्रिभुवने नपुंसके स्पष्टं। त्रैलोक्यं त्रिविष्टपं त्रिविष्टपं। स्वर्गाभिधानतया पुंस्त्वे प्रा
प्ते ऽयमारम्भः। द्यौः स्त्रियां। द्योदिवौ स्त्रत्रेलोपादानमिदं। इषुबाहू स्त्रियां च। चात्पुंसि। बाणबाहू नपुंसके च। चात्पुंसि त्रिविष्टपं त्यादि च। (२१)

स्त्री देवासुरेत्यस्यापवादः। नान्तः। अयं पुंसि। राजा। तक्षा। न च चर्मवर्मादिष्वतिव्याप्तिः। मन्‌व्द्यच्कोऽकर्तरीति नपुंसकप्रकरणे वक्ष्यमाणत्वा
त्। तु पुरुषकपोलगुल्फमेघाभिधानानि। तुः। अधरः। पुरुषः। नरः। कपोलः। गंडः। गुल्फः। प्रपदः। मेघः। नीरदः। अभ्रं नपुंसकं च
अस्यापवादः। उकारान्तः। अयं पुंसि स्यात्। प्रभुः। इक्षुः। हनुर्हट्टविलासिन्यां नृत्यारंभे गदे स्त्रियां। द्वयोः कपोलावयवे इति मेदिनिः। नूरेणुरिभ्यां
स्त्रीने मे इत्यमरः। एवं जातीयकविशेषणवचनानाम् उकारान्तस्य ग्रहणं तस्मात्स्वविषये उक्तो लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधितः इति। एव
मन्यत्रापि। धेनुरज्जुकुहूसरयुतनुरेणुप्रियंगवः स्त्रियां। समासे रज्जुः पुंसि च। कर्कटरज्जः। कर्कटरज्जुना। श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुताल
नि नपुंसके। वसु चार्थवाचि। अर्थवाचीति किं। वसुर्मयूखाग्निधनाधिपेषु। मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च। अयं मद्गुः। इदं मद्गु
एवं तः। मेरुः। सेतुः। दारुकशेरुजतुवस्तुमस्तूनि नपुंसके। रुत्वन्त इति पुंस्त्वस्यापवादः। इदं दारु। सक्तु नपुंसके च। सक्तु। सक्तुः। प्राग्रश्मेरकारान्तः। र
श्मिदिवसाभिधानमिति वक्ष्यति प्रागेतस्मादकारान्त इत्यधिक्रियते। कोपधः। कोपधोऽकारान्तः पुंसि स्यात्। स्तबकः। कल्कः। चिबुकशालूककशातिपदिको
शुकोल्मुकानि नपुंसके। पुंस्त्वस्यापवादः। कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडागनिष्कशुष्कवर्चस्कपिनाककुभांडकपिंडकपुलाका
नि नपुंसके च। अयं कण्टकः। इदं कण्टकमित्यादि। टोपधः। टोपधोऽकारान्तः पुंसि स्यात्। घटः। पटः। किरीटमुकुटललाटवटवारशृंगारकराटलोष्टानि नपुं
सके। किरीटमित्यादि। कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च। कुटः। कुटं। णोपधः। णोपधोऽकारान्तः पुंसि। गुणः। गणः। पा
षाणः। ऋणलवणपर्णतोरणरणोष्णानि नपुंसके। पुंस्त्वस्यापवादः। कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च। थोपधः। थोपधोऽ
थः। काष्ठपृष्ठरिक्थोक्थानि नपुंसके। इदं काष्ठमित्यादि। काष्ठा दिगर्था स्त्रियां। इमाः काष्ठाः। तीर्थप्रोथयूथगाथानि नपुंसके च। अयं तीर्थः। इदं ती

धीनोपधाः । इनः । फेनः । जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशातनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । पूर्वस्या
पवादः । मानपानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचंदनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च । अ
यमानः । इदं मानं । पोपधः । यूपः । दीपः । सर्पः । पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपांतरीपाणि नपुंसके । इदं पापमित्यादि । शूर्पकुतपकुणप
द्वीपविटपानि नपुंसके च । अयं शूर्पः । इदं शूर्पमित्यादि । भोपधः । स्तंभः । कुंभः । तलभं नपुंसकं । पूर्वस्यापवादः । जृंभं नपुंसके च । जृंभा जृंभः । मोपधः ।
सोमः । भीमः । रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुंकुमानि नपुंसके । इदं रुक्ममित्यादि । संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च ।
अयं संग्रामः । इदं संग्रामं । योपधः । समयः । हयः । किसलयहृदयेंद्रियोत्तरीयाणि नपुंसके । स्पष्टं । गोमयकषायमलयान्वयाव्ययानि नपुंसके च । गोमयः ।
गोमयं । रोपधः । क्षुरः । अंकुरः । द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रछिद्रनारतीरदूरकृच्छ्ररंध्राश्रश्वभ्रभीरतिमिरवज्रवैचित्र्यकेयूरकेदारोदराजस्र ज
शरीरकंदरमंदारपंजराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकश्मीरनीरांबरशिशिरतंत्रयंत्रसूत्रक्षेत्रमित्रकलत्रचि
शस्त्र ६ त्रसूत्रवक्त्रनेत्रगोत्रांगुलित्रभालत्राशस्त्रशास्त्रवस्त्रपत्रपात्रछत्राणि नपुंसके । इदं द्वारमित्यादि । शुक्रमदेवतायां । इदं शुक्रं । रेतः । चक्रवज्रांधकारसारवार
पारक्षीरतोमरशृंगारभृंगारमंदारोशीरतिमिरशिशिराणि नपुंसके च । चक्रः । चक्रमित्यादि । षोपधः । वृषः । वृक्षः । शिरीषर्जीषांबरीषपीयूषपुरीषकि सर्जीष
ल्बिषकल्माषाणि नपुंसके । यूषकरीषमिषविषवर्षाणि नपुंसके च । अयं यूषः । इदं यूषं । सोपधः । वत्सः । वायसः । महानसः । पनसबिसबुससाहसानि नपुंसके । ५
चमसांसरसनिर्यासोपवासकार्पासवासमासकासकंसमांसानि नपुंसके च । इदं चमसं । अयं चमसः । कंसं चाप्राणिनि । कंसो ध्रीपानभाजनं । प्राणिनि तु
कंसो नाम कश्चिद्राजा । रश्मिदिवसाभिधानानि । एतानि पुंसि स्युः । रश्मिः । मयूखः । दिवसः । घस्रः । दीधितिः स्त्रियां । मरीच्याः पवादः । दिनाहनी नपुंसके । अथ
पवादः । मानाभिधानानि । एतानि पुंसि स्युः । कुडवः । प्रस्थः । द्रोणाढकौ नपुंसके च । इदं [illegible] । अयं द्रोणः । खारीमानिके स्त्रियां । इयं खारी । इयं मानिका । दारा (३१)

तला जास्तनां बद्धत्वं च । इमे दाराः । नाभ्युपजनोपपदानि व्रणाङ्गपदानि । यथासंख्यं नाभ्याद्युपपदानि व्रणारीनि पुंसि स्युः । अयं नाभिव्रणः ।
अपांगः । जनपदः । व्रणादीनामुभयलिंगत्वेपि केवलनिरत्यर्थं सूत्रं । मरुत्ककुत्त रुद्रत्विजः । अयं मरुत् । ऋषिराशिदृतिग्रंथिक्रिमिध्व
निबलिकौलिमौलिरविकविकपिमुनयः । एते पुंसि स्युः । अयं ऋषिः । ध्वजगजमुंजपुंजाः । एते पुंसि । हस्तकुंत[illegible]तवातदूतधूर्तसूतकं पूनः २
तमुहूर्ताः । एते पुंसि । अमरस्तु मुहूर्तो स्त्रियामित्याह । षंडमंडकरंडवरंडतुंडगंडमुंडपाखंडशिखंडाः । अयं षंडः । वंशांशपुरोडाशाः । अ
यं वंशः । पुरोडाश्यते पुरोडाशाः कर्मणि घञ् । भवव्याख्यानयोः ठकुरणौ पौरोडाशपुरोडाशात्ष्वन्निति विकारजक्षकरणो[illegible]हे पुरोडाश इति च ।
निपातनात्प्रकृतस्य च एवं निपातनात् ह्रस्वत्वं । पुरोडुः शपुंजामिष्टमिति माघः । ह्रदकंदकुंदबुद्बुदशब्दाः । अयं ह्रदः । अर्घपथिमथ्यृभु
क्षिस्तंबनितंबपूगाः । अयमर्घः । पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरंगतुरंगगंधस्कंधमृदंगसंगसमुद्रपुंखाः ।
अयं पल्लव इत्यादि । सारथ्यतिथिकुक्षिबस्तिपाण्यंजलयः । एते पुंसि । अयं सारथिः ॥ इति पुंल्लिंगाधिकारः । नपुंसकं । अधिकारोयं ।
भावे ल्युडंतः । हसनं । भावे क्तेः इष्णुप्रत्ययश्च नः अकारो निष्ठा च । भावे या निष्ठा तदंतं क्लीबं स्यात् । हसितं । गीतं । लष्यञौ तद्धितौ शुक्ल
त्वं । शौक्ल्यं । ष्यञः पित्त्वसामर्थ्यात् स्त्रीत्वं । चातुर्यं । चातुरी । सामर्थ्यं । सामग्री । अचिंत्यं । अचिंती । कर्मणि च । ब्राह्मणादिगुणवचनेभ्यः ब्रा
ह्मणस्य कर्म ब्राह्मण्यं । यथादयगगनराधकृष्णा स्वभावकर्मणि एतदंतानि क्लीबानि । स्तेनाद्यन्नलोपश्च । स्तेयं । सख्युर्यः । सख्यं । कपिज्ञात्यो
र्ढक् । कापेयं । पत्यंतपुरोहितादिभ्यो यक् । आधिपत्यं । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योञ् । औष्ट्रं । हायनांतयुवादिभ्योण् । द्वैहायनं । कौ
मनोज्ञादिभ्यश्चेति वुञ् । पैतापुत्रकं । [illegible] । अव्ययीभावः । अधिस्त्रि द्वंद्वैकत्वं । पाणिपादं । अभाषायां हेमंतशिशिराव

होरात्रे चास्याहः। अन्तकर्मधारयस्तत्पुरुषः। अधिकारोयं। अनन्तोक्ताया। शरत्कायं। राजामनुष्यपूर्वसभा। इनं सभं इत्यादि। सेनासुराच्छायाशा
लानिशास्त्रियां चापरवतान्नतत्पुरुषः परवल्लिंगः स्यात्। रात्राह्नाहाः पुंसि। अपथं पुण्याहं नपुंसके। संख्यापूर्वारात्रिः। संख्यापूर्वेति किं। स
र्वरात्रः। द्विगुस्त्रियां चाप्यवस्थापूर्वा। पंचपूली। त्रिभुवनं। इसुसंतः। हविः। धनुः। अर्चिस्त्रियां च। इस्संतत्वेपि अर्चिः स्त्रियां नपुंसके चे चस्यात्।
इत्युक्तत्वान्न अर्चिः। छदिः स्त्रियामेवाइयंछदिः। छाद्यतेनेनेति छदिः। क्षुरादित्वात् निशुर्वीत्यादिनाइसाइस्मन्नित्यादिनाइस्। पटलं छदिरित्य
मरः। तत्र पटलसाहचर्यात् छदिषः क्लीबता वदतोमरव्याख्यातारः उपेक्ष्याः। मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्ना
नयनं द्व भिधानानि। एतेषामभिधानानि क्लीबे स्युः। मुखमाननं। लोचनं। लोहं कालं। अयः। वनं गहनं। मांसं आमिषं। रुधिरं रक्तं। कार्मुकं
शरासनं। विवरं बिलं। जलं वारि तोयं। हलं लांगलं। धनं द्रविणं। अन्नं अशनं। अस्यापवादः नाहत्रिसूत्यासीरार्थोदनाः पुंसि। वक्त्रने
त्रारण्यगाण्डीवानि पुंसि च। वक्त्रो वक्त्रं। नेत्रो नेत्रं। अरण्योरण्यं। गाण्डीवो गाण्डीवं। अटवीस्त्रियां। लोपधः। कुलं कूलं स्थलं कूलं। तूलोपल
तालकुसूलतरलकंबलदेवलवृषलाः पुंसि। अपूपः। शीलमूलमंगलसालकमलतलमुसलकुंडलपललमृणालबालनिगलपलाल
बिसजालाविशसरलाः पुंसि च। शीलः शीलं इत्यादि। शतादिः संख्या। शतं सहस्रं। शतादिरिति किं। एको द्वौ बहवः। संख्येति किं। शतशृंगो नाम
पर्वतः। शतायुतप्रयुताः पुंसि च। अयं शतः। इदं शतमित्यादि। लक्षाकोटी स्त्रियां। इयं लक्षा। इयं कोटिः। लक्षो नियुतं च तदित्यमरः।
शंकुःबेपि। लक्षः शंकुः पुंसि। सहस्रं क्वचित्। अयं सहस्रः। इदं सहस्रं। मन्द्व्यच्कोकर्तरि। मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्यान्न तु कर्तरि। चर्म वर्म।
द्व्यच्कः किं। अणिमा महिमा। अकर्तरि किं। ददातीति दामा। ब्रह्म पुंसि च। अयं ब्रह्मा। इदं ब्रह्म। नाम रोम एतेन पुंसके। मन्नं द्व्यच्कः इत्यस्याप्र
पंचः। असन्तो द्व्यच्कः। यशः। मनः। तपः। द्व्यच्कः किं। चन्द्रमाः। अप्सराः स्त्रियां। एतान्यसेरसन्यायेण अयं बहुवचनान्तः। अन्तः। पत्रं छत्रं॥ (४)

यात्रामात्रामस्त्रादंष्ट्रावरत्राः स्त्रियामेवा मत्रामित्रहूत्रत्रा त्रपुत्रमंत्रमेक्षाष्ट्राः पुंसि। अयं मन्त्रौ मित्रौ अमित्रः। तस्यमित्रा एयमित्रास्तेइतिमाघः। सखा
तामभिमित्रौमित्रेनेतिच। यत्तुधिषोमित्रइतिसूत्रेहरदत्तेनोक्तं। क्षेमेर्दिषतिविदितौ एणदिकइरेव। अमेरमित्रं। अमित्रस्यथयेत्वा दोमध्यो
दात्तस्तु चिंत्यः। नक्षमासेपथ्यवं। परक्षिंगतापिस्यादितितु तत्रदोषांतरमिति। तस्मक्तत्रस्यापर्यालोचनमूलकं। स्वरदोषोऽप्यवनमपिनक्षेम
रमरमित्रमृता इतिषाष्ठसूत्रास्मरणमूलकमितिदिक्। पात्रपात्रपवित्रसूत्रछत्राः पुंसिच। बिलकुसुमअलपत्रनरणाभिधानानि।
बलं। वीर्यं। पद्मकमलोत्पलानिपुंसिच। पद्मादयः शब्दाः कुसुमाभिधायिवैपिद्विलिंगाः स्फः। अमरोप्याह। वापुंसिपद्ममिति। [redacted]
य एवं अर्द्धर्चादिसूत्रे जलजेपद्मंनपुंसकमिवेतिहृत्तिग्रंथोमतांतरेणनेयः। प्रविंसयामोपुंसि। आजिः स्त्रियामेव। फलजातिः। फलजातीवा
चीशब्दोनपुंसकंस्याव। आमलकं। आम्रं वृक्षजातिः स्त्रियामेवाक्के चिरेवेदाहरीतकी। वियद्जगत्कुंकन्तुपृषत्पुछकुरुंघकडुरश्वितः एतेक्लीबाः स्फः।
वि गर्णि(?) नवनीतावतानाहृतामृतनिमित्तचित्तब्रतरजतवृत्तफूलितानि। श्राद्धकुलिशदैवपीठकुंडांगंगरदधिसक्थ्यास्यास्पदाकाशकण्वबीजा
१ नि। एतानिक्लीबेस्फः। दैवंपुंसिच। दैवं दैवः। धनान्नजसस्पस्तृणअक्षुपपापवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापसमल्पाशिक्यकुसुमयहमर्याद
र्मसिन्यानिइदं धन्यमित्यादि। दंहबर्हदुःखबडिशपिच्छविंबकुटुंबकवचवरशरहंदारकाणि। अर्धभिंजियोइंद्रियेकिं। दृष्टा
गादौमाभूत्। इतिनपुंसकाधिकारः। स्त्रीपुंसयोः। गोमणियष्टिमुष्टिपाटलिबस्तिशाल्मलित्रुटिमसिमरीचयः। इयमयंवागोः।
मृत्युसिंधुकर्कंधुकिष्कुकंडुरेणवः। इयमयंवामृत्युः। गुणवचनस्तुकारांतनपुंसकंच। त्रिलिंगमित्यर्थः। पटु। पटुः। पट्वी। अपत्यार्थत
द्धितेऔपगवः। औपगवी। इतिस्त्रीपुंसाधिकारः। पुंनपुंसकयोः। घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः। अयंघृतः। इदंघृतं। शृंगार
द्य निदाघोद्यमशल्यदृढाः। अयंशृंगः। इदंशृंगं। व्रजकुंजकुथकूर्चपुंसादयोमासार्धचंदनपुलकाः। अयंवज्रः। इदंवज्रं। कबंधौषधायुधांतः॥॥

स्वंडी

रंड मंड ~~अं~~ शब्दसैं धव पार्श्वाकाश कुशाकाशं कुशा ~~ढ~~ निशाः॥ एते पुंनपुंसकयोः स्युः। कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले इति विश्वः। शालाकावा
चित्सि ~~त्रि~~ यां तथा च जानपदादिसूत्रे णायोविकारे ङीषि कुशी। शरूणिलुडापू। कुशा वानस्पत्याः स्याम मापातेति श्रुतिः। अतः हकमी तिसूत्रे
कुशा कर्णी निपिवेति प्रयोगश्च॥ व्यासस्तुवे ~~या~~ हाना तृपीयन शब्दशेषत्वात्। कुशाच्छदइति। तत्र शारीरकभाष्ये प्येवं। एवं च श्रुतिसूत्र भाष्या
णामेकवाक्यत्वे स्थिते आ च्छंद इत्याङ्रुपश्लेषादिपरो भामतीग्रंथः। ओद्रिवाद मात्रपर इति निभावनीयं च स्तुतेः। गृह मेह देह प
ट पट हाष्टाप दांबुद ककुदाश्च॥ इति पुंनपुंसकाधिकारः। अविशिष्टलिंगं। अव्ययं। कतियुष्मदस्मदः। ष्णांतासंख्या। शिष्टा
परवत्। एकः पुरुषः। एका स्त्री। एकं कुलं। गुणवचनं च। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रं। कृत्याश्च। करणाधिकरणयो
र्युट्। सर्वादीनि सर्वनामानि। स्वप्रधानार्थे यं त्रिसूत्री॥ ८॥ इति महोजी दीक्षित विरचिता [redacted] लिंगानुशासनवृत्तिः समाप्ता॥
संवत् १९२८ समये कार्तिकेमासि शुक्लपक्षे लिखितं पं॰ हरदेवेन॥ शुभमस्तु॥ ॥ शिष्या हं हरदेशितानाम्॥ श्रीगणेशाय नमः॥

८५

(१५)